E-Text

पत्रस्य नाम : **परिभाषेन्दुशेखरः (1-49 परिभाषाः)**

पत्रस्य संख्या : **IV**

पाठ्यांशनाम : **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः, पुनः प्रसङ्गविज्ञानात्सिद्धम्, सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव (प्रथमपाठः)**

पाठ्यांशसंख्या : **34**

पाठ्यांशस्य मुख्याः अंशाः :

1) पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिभाषा।

2) अस्याः परिभाषाया उदाहरणानि।

3) पुनः प्रसङ्गविज्ञानादिति, सकृद्गतौ विप्रतिषेधे इति।

4) उभयोः परिभाषयोः विप्रतिषेधसूत्रं मूलमिति।

5) तृजादिवच्छास्त्रीयदृष्टान्तेन सकृद्गतिन्यायसिद्धिः।

6) लौकिकदृष्टान्तेन पुनः प्रसङ्गन्यायसिद्धिः इत्यादीनि।

विषयसूची :

1.0 : प्रस्तावना

2.0 : पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः

2.1 : पूर्वात्परं बलवदित्याद्यर्थकल्पने हेतुः

2.2 : पूर्वात्परमित्यादीनां क्रमेणोदाहरणानि

3.0 : पुनः प्रसङ्गविज्ञानात्सिद्धमिति परिभाषावतरणम्

3.1 : परिभाषार्थः

3.2 : परिभाषया प्रसक्तदोषवारणम्

4.0 : सकृद्गतौ विप्रतिषेध इत्यादिपरिभाषावतरणं परिभाषार्थश्च

4.1 : तृजादिवदिति शास्त्रीयदृष्टान्तेन सकृद्गतिन्यायसिद्धिः

4.2 : तुल्बलयोरित्यादि लौकिकदृष्टान्तेन पुनः प्रसङ्गन्यायसिद्धिः

5.0 : विषयसंग्रहः

Pathshala पाठशाला
A Gateway to all Post Graduate Courses

1.0 प्रस्तावना

परिभाषेन्दुशेखरे शास्त्रत्वसम्पादनोद्देशबाधबीजशास्त्रशेषनामकानि त्रीणि प्रकरणानि सन्ति इति ग्रन्थारम्भे एव भवन्तः ज्ञातवन्तः। तेषु शास्त्रत्वसम्पादनोद्देशप्रकरणसमाप्त्यनन्तरं बाधबीजप्रकरणमारब्धं ग्रन्थकारेण। शास्त्रत्वसम्पादनान्तरमेव बाधबीजप्रकरणारम्भे बीजं तु - शास्त्रत्वसम्पादनं विना अनेन शास्त्रेण अस्य शास्त्रस्य बाधः इति कथमपि प्रतिपादयितुमसंभवरूपम्। यतः यावता सूत्रेषु शास्त्रत्वं नैव सम्पाद्यते तावता अनेन शास्त्रेण अस्य बाधः इत्यादिकमुपपादयितुमेव न शक्यते। शास्त्रत्वस्यैव अनुपपन्नत्वात्। एवञ्च बाधबीजप्रकरणे परस्परशास्त्रेषु बाध्यबाधकचिन्तायां किं बीजम् इत्येतत्सर्वं भवन्तः पठिष्यन्ति। शास्त्रत्वसम्पादनोद्देशप्रकरणे यदा सूत्रेषु शास्त्रत्वं सम्पादितं ततस्तेषु परस्परबाध्यबाधकचिन्ता लक्ष्यसम्पादनावस्थायां तदर्थं प्रकरणमिदमारब्धम्।

तत्रैकेनोदाहरणेन शास्त्रयोः बाध्यबाधकभावे सति प्रवृत्तौ किं बीजम्? येन एकं शास्त्रं बाधित्वा अपरं शास्त्रं प्रवर्तते इति निरूपयामः सङ्क्षेपेण। तथा हि - 'रामेभ्यः' इत्यादौ "सुपि च" (7-3-102) इति दीर्घस्य "बहुवचने झल्येत्" (7-3-103) इति एत्वस्य च युगपत् प्रसक्तिः। तत्र कतरत् सूत्रं प्रवर्तनीयमिति निर्णये "विप्रतिषेधे परं कार्यम्" (1-4-2) इति सूत्रं नियमयति यद् "बहुवचने झल्येत्" (7-3-103) इति परत्वादत्र प्रवर्तते, अतः एत्वमेव करणीयं तेन रामेभ्यः इत्यत्र एत्वसिद्धिः। अत्र यथा पूर्वापेक्षया परत्वमेव "बहुवचने झल्येत्" (7-3-103) इत्यस्य प्रवृत्तौ बीजम्, तद्वदन्यत्र पूर्वात् परं, पूर्वात् नित्यं, परान्नित्यमित्यादिरीत्या द्वयोः शास्त्रयोः बाध्यबाधकभावे बीजं "पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः" इति परिभाषया बोध्यते। अनया रीत्या अस्मिन् पाठ्यांशे भवन्तः "पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः",

"पुनः प्रसङ्गविज्ञानात् सिद्धम्", "सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव" इति परिभाषात्रयस्य विषये पठिष्यन्ति।

2.0 पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः

अस्मिन् द्वितीयप्रकरणे शास्त्रयोः परस्परं बाधबीजं किमिति निरूपयितुं प्रथमां परिभाषामुपस्थापयति ग्रन्थकारः -

पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।। 38

परिभाषार्थः – पूर्व-पर-नित्य-अन्तरङ्ग-अपवादशास्त्रेषु पूर्वपूर्वापेक्षया उत्तरोत्तरं शास्त्रं बलीयः भवति। तेन पूर्वात् परशास्त्रं, परान्नित्यशास्त्रं, नित्यादन्तरङ्गशास्त्रम्, अन्तरङ्गादपवादशास्त्रं क्रमेण बलीयः भवति। एवमेव उत्तरोत्तरमिति कथनात् पूर्वात् परशास्त्रं, नित्यशास्त्रम्, अन्तरङ्गशास्त्रम्, अपवादशास्त्रं बलीयः, पराद् नित्यशास्त्रम्, अन्तरङ्गशास्त्रम्, अपवादशास्त्रं बलीयः, नित्याद् अन्तरङ्गशास्त्रम्, अपवादशास्त्रं बलीयः, अन्तरङ्गादपवादशास्त्रं च क्रमेण बलीयः इति समुदितार्थः फलति।

e-Pathshala ई-पाठशाला
A Gateway to all Post Graduate Courses

2.1 पूर्वात्परं बलवदित्याद्यर्थकल्पने हेतुः

पूर्वात्परं बलवद्भवतीति कथने हेतुः भवति "विप्रतिषेधे परं कार्यम्" (1-4-2) इति शास्त्रम्। विप्रतिषेधत्वं नाम तुल्यबलविरोधः। तुल्यबलत्वञ्च अन्यत्र सावकाशयोः द्वयोः शास्त्रयोः एकत्र लक्ष्ये युगपत्प्रवृत्तिप्रसङ्गत्वम्। तयोः यत्परं तदेव परत्वं पूर्वशास्त्रस्य बाधे परशास्त्रस्य प्रवृत्तौ च बीजम्। परत्वञ्चात्र सूत्राणाम् अष्टाध्यायीपठितसूत्रक्रमत्वम्।

अत्रेदमवधेयम् – इदञ्च परशास्त्रं बहिरङ्गं न स्यात्, अनित्यं न स्यात्, उत्सर्गरूपं न स्यात्। एतत्त्रितयधर्मरहितमेव परशास्त्रं तुल्यबलयोः पूर्वस्य बाधकं

भवति। यतः बहिरङ्गत्वम्, अनित्यत्वम् उत्सर्गत्वञ्च एते त्रयो धर्माः दुर्बलत्वे हेतवः भवन्ति। एतदनेन प्रकारेणापि निरूपयितुं शक्यते यत् शास्त्रीयकार्ये बाध्यबाधकभावनिर्णयः द्वयोरेव शास्त्रयोः कार्ययोर्वा मध्ये क्रियते तच्च पूर्वत्वपरत्वरूपेण गृह्यते। एतयोरेव द्वयोर्मध्ये नित्यानित्यभावः, अन्तरङ्गबहिरङ्गभावः उत्सर्गापवादभावश्च प्रकल्प्यते। अनया रीत्या पूर्वपरशास्त्रयोर्मध्ये यन्नित्यम् अन्तरङ्गम् अपवादो वा तदेव अन्यस्य बाधकम्, यतः नित्यान्तरङ्गापवादानां बलवत्वमधिकम्। अत एव पूर्वशास्त्रं यदि नित्यम्, अन्तरङ्गमपवादो वा तदा परमपि बाधते। सर्वस्यापि कथनस्यायमभिप्रायः यत् एतत्त्रितयधर्मयुक्तं पूर्वशास्त्रं परशास्त्रं वा स्यात् तदा तयोः तुल्यबलं निरूपयितुं न शक्यते। तुल्यबलमित्युक्ते द्वे अपि शास्त्रे नित्ये अनित्ये वा, अन्तरङ्गे बहिरङ्गे वा, उत्सर्गौ अपवादौ वा स्याताम्। तदा एव परशास्त्रं पूर्वापेक्षया बलवत्वात् पूर्वं बाधित्वा प्रवर्तते। अनया परिभाषया "विप्रतिषेधे परं कार्यम्" (1-4-2) इति सूत्रेण विधीयमानमेव कार्यं क्रियते अत इयम् एतत्सूत्रभूता परिभाषा इति वक्तुमुचितम्।

2.2 पूर्वात्परमित्यादीनां क्रमेणोदाहरणानि

1. पूर्वात् परं बलवत् "रामेभ्यः" – पूर्वशास्त्रापेक्षया परशास्त्रं बलवद्भवति इत्यस्य उदाहरणं वर्तते रामेभ्य इत्यादि। तत्र राम इति अदन्तप्रातिपदिकात् "कृत्तद्धितसमासाश्च" (1-2-46) इति सूत्रेण प्रातिपदिकसंज्ञायां चतुर्थीपञ्चम्योः बहुवचनविवक्षायां "स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्याम्भ्यस्...." (4-1-2) इति सूत्रेण भ्यस्-प्रत्यये, राम+भ्यस् इति जाते यञादौ सुपि परे "सुपि च" (7-3-102) इति दीर्घः, झलादौ बहुवचने सुपि परे "बहुवचने झल्येत्" (7-3-103) इति एत्वं च युगपत् प्राप्नुतः। "बहुवचने झल्येत्" (7-3-103) इत्यस्य अप्राप्तिस्थलं 'रामाय' इति तत्र "सुपि च" (7-3-102) इति चरितार्थः। एवमेव "सुपि च" (7-3-102)

इत्यस्य अप्राप्तिस्थलं 'रामेषु' तत्र "बहुवचने झल्येत्" (7-3-103) इति चरितार्थः। तस्मात् एतयोः शास्त्रयोः समबलत्वं सम्पन्नम्। अनयोः एकत्र लक्ष्ये 'रामेभ्यः' इत्यत्र युगपत् प्राप्तयोः तुल्यबलविरोधे सति "बहुवचने झल्येत्" (7-3-103) इति शास्त्रं परत्वात् "सुपि च" (7-3102) इति शास्त्रं बाधित्वा प्रवर्तते। ततः सस्य रुत्वे विसर्गे रामेभ्यः इति सिद्ध्यति।

2. परान्नित्यं बलवत् "तुदति" – "परान्नित्यं बलवत्" इत्यस्य उदाहरणं भवति तुदति इत्यादि। तथा हि - तुद्-धातोः परस्मैपदे "वर्तमाने लट्" (3-1-123) इति सूत्रेण लट्लकारे, "तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्" (3-4-78) इति सूत्रेण प्रथमपुरूषैकवचनविवक्षायां तिप्-प्रत्ययेऽनुबन्धलोपे, "तिङ्शित्सार्वधातुकम्" (3-4-113) इति सूत्रेण तिङः सार्वधातुकसंज्ञायां, तुद्+ति इति दशायां "तुदादिभ्यः शः" (3-1-77) इति शविकरणप्रत्ययः, "पुगन्तलघूपधस्य च" (7-3-86) इति लघूपधगुणश्च युगपत् प्राप्नुतः। तत्र लघूपधगुणः यद्यपि परस्तथापि लघूपधगुणे कृतेऽकृते च शप्रत्ययः प्रवर्तते, अतः स नित्यः। शप्रत्यये कृते तु लघूपधगुणो न प्रवर्तते, शप्रत्ययस्य "सार्वधातुकमपित्" (1-2-4) इति सूत्रेण अपित्सार्वधातुकत्वात् ङित्त्वात् तस्मिन् परे "क्ङिति च" (1-1-5) इति गुणनिषेधात्। तस्मात् परमपि लघूपधगुणं बाधित्वा नित्यत्वात् पूर्वं शप्रत्ययो भवति। ततः अनुबन्धलोपे तुद्+अ+ति इति जाते लघूपधगुणे प्राप्ते, तस्य शे परे शप्रत्ययस्य अपित्सार्वधातुकत्वात् ङित्त्वात् तस्मिन् परे "क्ङिति च" (1-1-5) इति गुणनिषेधात् तुदति इति सिद्ध्यति।

3. पराद् अन्तरङ्गं बलवत् "उभये देवमनुष्याः" – परादन्तरङ्गस्योदाहरणं भवति उभये देवमनुष्या इत्यादि। तत्र उभयशब्दात् "कृत्तद्धितसमासाश्च" (1-2-46) इति सूत्रेण प्रातिपदिकसंज्ञायां प्रथमाविभक्तौ बहुवचनविवक्षायां "स्वौजसमौट्छष्टा-भ्यांभिस्...." (4-1-2) इति सूत्रेण जस्-प्रत्यये, उभय+जस् इति दशायां

"प्रथमचरमतयाल्पार्धकतिपयनेमाश्च" (1-1-33) इति सूत्रेण जसः शीभावे कर्तव्ये विकल्पेन सर्वनामसंज्ञा प्राप्नोति। एवमेव अस्यामेवास्थायां "सर्वादीनि सर्वनामानि" (1-1-17) इत्यनेन नित्या सर्वनामसंज्ञा प्राप्नोति। यद्यपि "प्रथमचरमतया..." इति परशास्त्रं तथापि जसः कार्ये कर्तव्ये विभक्तिसापेक्षा सर्वनामसंज्ञा बहिरङ्गा, "सर्वादीनि...." इति सर्वनामसंज्ञा विभक्तिनिरपेक्षा अन्तरङ्गा। अतः अन्तरङ्गत्वात् "सर्वादीनि सर्वनामानि" इति सूत्रं परमपि "प्रथमचरमतयाल्पार्धकतिपयनेमाश्च" इति सूत्रं बाधित्वा पूर्वं प्रवर्तते। अन्तरङ्गस्य बलवत्त्वन्तु "असिद्धं बहिरङ्गमन्तरङ्गे" इति परिभाषया बोध्यते। तत उभय+जस् इत्यत्र जसः शीभावेऽनुबन्धलोपे गुणैकादेशे उभये इति सिध्यति।

4. परात् अपवादः बलीयान् "दध्ना" – दधिशब्दात् प्रातिपदिकसंज्ञायां तृतीयैकवचने "स्वौजसमौट्छष्टाभ्यांभिस्....." (4-1-2) इति सूत्रेण टाप्रत्यये, दधि+टा इति दशायाम् "अस्थिदधिसक्थ्यक्ष्णामनडुदात्तः" (7-1-75) इति सूत्रेण टादावचि अस्थ्यादीनामनङ् कर्तव्यः। अनङादेशः ङित् अनेकाल्च। अतः "ङिच्च" (1-1-53) इत्यनेन अन्त्यस्यालः प्राप्नोति। "अनेकाल्शित्सर्वस्य" (1-1-55) इत्यनेन सर्वस्य प्राप्नोति। अस्यामवस्थायां परमपि "अनेकाल्शित्सर्वस्य" इति सर्वादेशं "ङिच्च" इति अपवादत्वात् बाधित्वा पूर्वं प्रवर्तते। अपवादशास्त्रस्य बलवत्त्वं 'येन नाप्राप्ति'न्यायेन बोध्यते। यत्कर्तृकावश्यप्राप्तौ यो विधिरारभ्यते स तस्यापवादः। निरवकाशत्वं हि अपवादस्य बीजम्। यतः ङिदादेशाः सर्वेऽपि अनेकाल एव। तत्र सर्वत्रापि अनेकाल्शिदिति सर्वादेशप्रसक्तौ "ङिच्च" इति शास्त्रं व्यर्थमेव स्यात्। अनेकाल्विशेषेषु ङित्सु अनेकालशिदिति सर्वादेशाप्रसक्तावपि न दोषः। तस्य अस्तेर्भूः इत्यादिषु अङिदनेकालादेशेषु सावकाशत्वात्। एतद्विषये येन नाप्राप्तिपरिभाषापठनावसरे इतोऽपि विस्तरेण ज्ञास्यन्ति भवन्तः। एवञ्च

Pathshala पाठशाला A Gateway to all Post Graduate Courses

अन्त्यस्यालः अनङादेशे दध्अन्+आ इति जाते भत्वात् "अल्लोपोऽनः" इति अकारलोपे दध्ना इति सिध्यति।

5. नित्यादन्तरङ्गं बलीयः "ग्रामणिनि कुले" – सप्तम्यन्त प्रयोगोऽयम्। ग्रामं नयतीति ग्रामणी तस्मिन् कुले इति विवक्षिते ग्रामणीशाब्दात् सप्तम्येकवचने ङिप्रत्यये, ग्रामणी+इ इति दशायां "इकोऽचि विभक्तौ" (7-1-73) इति अजादौ विभक्तौ परतः नुम्, "ह्रस्वो नपुंसके प्रातिपदिकस्य" (1-1-47) इति प्रातिपदिकस्याचः ह्रस्वश्च युगपत् प्राप्नुतः। तत्र नुम् तु ह्रस्वे कृतेऽकृते च भविष्यति अतः स नित्यः। ह्रस्वस्तु नुमि कृते न प्रवर्तेत अजन्तत्वाभावात्, परन्तु विभक्तिनिरपेक्षत्वात् अन्तरङ्गः सः। अतोऽत्र नित्यमपि नुमं ह्रस्वः अन्तरङ्गत्वात् बाधित्वा पूर्वं प्रवर्तते। एवञ्च प्रथमं ह्रस्वे कृते ग्रामणि+इ इति जाते "इकोऽचि विभक्तौ" इति नुमि ग्रामणिनि इति सिद्ध्यति।

6. अन्तरङ्गादपवादः बलीयान् "श्रीशः" – अन्तरङ्गापेक्षया अपवादस्य बलवत्त्वे उदाहरणं भवति श्रीशः इत्यादि। तत्र श्री+ईश इत्यवस्थायां "इको यणचि" (6-1-77) इति यणादेशः, "अकः सवर्णे दीर्घः" (6-1-97) इति सवर्णदीर्घैकादेशः युगपत्प्राप्नुतः। तत्र "इको यणचि" इति यण् अज्मात्रापेक्षत्वादन्तरङ्गः, सवर्णदीर्घस्तु सवर्णाजपेक्षत्वात् बहिरङ्गस्तथापि बहिरङ्गोऽपि सवर्णदीर्घः अपवादत्वात् अन्तरङ्गं यणं बाधते। सवर्णाच्स्थलेऽपि यणः प्रसक्त्या सवर्णदीर्घः निरवकाशत्वात् अपवादो भवति। इत्थं पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इतीयं परिभाषा समाप्ता।

3.0 पुनः प्रसङ्गविज्ञानात्सिद्धमिति परिभाषावतरणम्

एवं "पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः" इति परिभाषया पूर्वापेक्षया परशास्त्रस्य बलवत्त्वस्वीकारे परशास्त्रेण पूर्वशास्त्रे बाधिते 'भिन्धि' इत्यादौ परत्वात् तातङादेशेन बाधितः धिभावो न स्यात् इति ग्रन्थे अवतारिका

वर्तते। अवतारिकाया अयं भावः – रौधादिकात् भिद्-धातोः परस्मैपदे "लोट् च" (3-3-162) इति सूत्रेण लोट्लकारे, मध्यमपुरुषे एकवचनविवक्षायां "तिप्तस्झिसिप्थस्थ....." (3-4-78) इत्यादि सूत्रेण सिपि, तस्य "तिङ्शित्सार्वधातुकम्" (3-4-113) इत्यनेन सार्वधातुकसंज्ञायां "रुधादिभ्यः श्नम्" (3-1-78) इति श्नम्विकरणे, तस्य मित्वात् अन्त्यादचः परत्वेन अन्तावयवत्वेन जाते, भिनद्+सि इति जाते "सार्वधातुकमपित्" (1-2-4) इत्यनेन ङिद्वद्भावे, "श्नसोरल्लोपः" (6-4-111) इति सूत्रेण सार्वधातुके क्ङिति परे श्नम्प्रत्ययस्य अकारस्य लोपे, भिन् द्+सि इति जाते "सेर्ह्यपिच्च" (3-4-87) इति सूत्रेण सिस्थाने हि-आदेशे, भिन् द्+हि इति जाते "हुझल्भ्यो हेर्धिः" (6-4-101) इति सूत्रेण हि-स्थाने धिभावे प्राप्ते तद्बाधित्वा "तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्" (7-1-35) इति सूत्रेण परत्वात् विकल्पेन तातङादेशे भिन् द्+तात् इति जाते "झरो झरि सवर्णे" (8-4-65) इति सूत्रेण झर्वर्णस्य दकारस्य सवर्णे झरि तकारे परे वा लोपे, भिन्तात् इति सिध्यति। तातङभावपक्षे हिस्थाने धिकृते भिन् द्+धि इति दशायां दकारलोपे भिन्धि इति द्वितीयं रूपं सिध्यति इति वस्तुस्थितिः। परन्तु तातङभावपक्षे धिर्न स्यादिति अवतारिकायां दोषः दत्तः पूर्वपरिभाषास्वीकारे।

अत्र प्रश्नः – तातङः वैकल्पिकत्वात् यदा तातङ् न प्रवर्तते तदा तदभावे हिस्थाने धिः भवितुमर्हति। तथा च 'भिन्धि' 'भिन्तात्' इति रूपद्वये सिद्धे तातङा बाधितः धिर्न स्यादिति कथनमेव न युज्यते। तर्हि अवतारिकायां कथमयं दोषो दत्तः?

अत्र समाधानम् – "तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्" इति तातङविधायके सूत्रे विभाषार्थकान्यतरस्यामिति पदमुच्चारितम्। विभाषापदेन अभावसमानाधिकरणविधिर्भवतीति अर्थः कल्प्यते। तेन विभाषापदसाहचर्यात् अभावसमानाधिकरणकः तुह्योः स्थाने तातङ् विधीयते इत्यर्थः सम्पद्यते। तथा च तातङ्

तदभावयोः उभयोरपि विधेययोः शब्दतः एव लभ्यत्वात् भिन् द्+हि इत्यवस्थायां परत्वात् "हुझल्भ्यो हेर्धिः" इति धिभावं बाधित्वा तातङ् तदभावश्च प्रवर्तेते। ततः तातङ् यदा न भवति तदा तदभावविधेयस्य तत्र सत्त्वात् अभावेन बाधितः धिर्न स्यादिति अभिप्रायः अवतारिकायाः। तस्मात् अवतारिकायां प्रदर्शितः दोषः युज्यते एव।

एवञ्चोपर्युक्तरीत्या तातङभावेन बाधितः धिर्न स्यादिति। अतः तातङभावपक्षेऽपि धिर्यथा स्यात् तदर्थं परिभाषेमारब्धा –

पुनः प्रसङ्गविज्ञानात्सिद्धम् ।। 39 ।।

3.1 परिभाषार्थः

पुनः प्रसङ्गविज्ञानात्सिद्धम् इत्यत्र द्वारमित्यध्याहार्यम्। उपाय इति तदर्थः। एवञ्च परिभाषार्थ इत्थं फलति - "परशास्त्रप्रवृत्त्युत्तरं पुनः प्रसङ्गविज्ञानात् पूर्वशास्त्रप्रवृत्तेः द्वारमुपायः सिद्ध इति। यद्वा परिभाषायां प्रसङ्गशब्दः लुसससम्यन्तः, प्रसङ्गे सति इत्यर्थः। प्रसङ्गे सति = पूर्वशास्त्रस्य प्राप्तौ सत्यां, पुनः विज्ञानात् = पुनः पूर्वशास्त्रप्रवृत्तेः बुद्धिविषयीकरणात् सिद्धं = कार्यं सिद्धं भवति।

3.2 परिभाषया प्रसक्तदोषवारणम्

प्रकृतपरिभाषया तातङभावेन बाधितो धिर्न सिध्यति इत्येवमापादितो दोषो वार्यते। "तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्" (7-1-35) इति सूत्रेण परत्वात् धिभावं बाधित्वा तातङ् तदभावस्य च विधेयत्वात् तातङः अप्रसक्तौ तदभावस्थाने यदा पुनः "हुझल्भ्यो हेर्धिः" (6-4-101) इति धिभावप्रसङ्गो भवति तदा तत्प्रसङ्गे सति तत्प्रवृत्तौ द्वारं सिद्धम्। तेन तातङभावपक्षे धिर्भूत्वा भिन्धि इति रूपमपि सिद्ध्यति। अनया रीत्या पुनः प्रसङ्गविज्ञानात्सिद्धम् इति परिभाषाविषयः समाप्तः।

A Gateway to all Post Graduate Courses

4.0 सकृद्गतौ विप्रतिषेध इत्यादिपरिभाषावतरणं परिभाषार्थश्च

सर्वत्र लक्ष्ये "पुनः प्रसङ्गविज्ञानात्सिद्धम्" इति परिभाषास्वीकारे 'तिसृणाम्' इत्यत्र परत्वात् तिस्रादेशे पुनः त्रयादेशः स्यात्। तदित्थं – त्रिशब्दात् स्त्रीलिङ्गे षष्ठीबहुवचनविवक्षायां त्रि+आम् इत्यवस्थायां "त्रेस्त्रयः" (7-1-53) इति सूत्रेण त्रिशब्दस्य आमि परे त्रयादेशः, "त्रिचतुरोः स्त्रियां तिसृचतसृ" (7-2-99) इति सूत्रेण स्त्रीलिङ्गे विभक्तौ परतः त्रिशब्दस्य तिस्रादेशश्च युगपत् प्राप्नुतः। तत्र परत्वात् त्रयादेशं बाधित्वा तिस्रादेशे, तिसृ+आम् इति स्थिते "ह्रस्वनद्यापो नुट्" (7-1-54) इति ह्रस्वान्तात् नद्यन्तात् आबन्तात् चाङ्गात् परस्य आमः नुटि प्राप्ते तद्बाधित्वा, "अचि र ऋतः" (7-2-100) इति सूत्रेण तिसृचतसृ-इत्यनयोः ऋकारस्य अजादौ रेफादेशे प्राप्ते "नुमचिरतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन" इति वार्तिकेन पूर्वविप्रतिषेधात् रेफादेशं प्रबाध्य पूर्वं नुटि, तिसृ+न् आम् इति जाते "नामि" (6-4-3) इति दीर्घे प्राप्ते "न तिसृचतसृ" (6-4-4) इति दीर्घनिषेधे "ऋवर्णान्नस्य णत्वं वाच्यमिति" इति वार्तिकेन णत्वे 'तिसृणाम्' इति सिद्ध्यति।

परन्तु तिस्रादेशे जाते तिसृ+आम् इति स्थिते स्थानिवद्भावेन तस्य त्रिशब्दत्वातिदेशात् 'पुनः प्रसङ्गविज्ञान'न्यायेन "त्रेस्त्रयः" इति त्रयादेशः स्यात्। तथा सति तिसृणामिति रूपं न सिद्ध्येत्। अतः परिभाषेयमारब्धा –

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ।। 40 ।।

परिभाषार्थः – तुल्यबलविरोधे सति सकृद्गतौ = द्वयोः शास्त्रयोः युगपत्प्राप्तौ सत्यां परशास्त्रेण यच्छास्त्रं बाधितं तद्बाधितमेव भवति। तेन त्रिशब्दस्य स्थाने त्रयादेशतिस्रादेशयोः युगपत्प्राप्तयोः परत्वात् तिस्रादेशेन त्रयादेशे बाधिते स बाधित एव भवति न पुनः तस्य प्रवृत्तिरिति परिभाषार्थः।

सकृद्गतिन्यायस्य पुनः प्रसङ्गन्यायस्य च मूलं विप्रतिषेधसूत्रमेव। सूत्रस्य नियमार्थत्वे सकृद्गतिन्यायसिद्धिः, विध्यर्थत्वे पुनः प्रसङ्गन्यायसिद्धिः। अनयोर्द्वयोरपि न्याययोः सिद्धिप्रकारः क्रमेण शास्त्रीयदृष्टान्तेन लौकिकदृष्टान्तेन निरूप्यते। तथा हि -

4.1 तृजादिवदिति शास्त्रीयदृष्टान्तेन सकृद्गतिन्यायसिद्धिः

विप्रतिषेधसूत्रस्य नियमार्थत्वे सकृद्गतिन्यायसिद्धिः इति तृजादिवच्छास्त्र-द्वयेत्यादि शास्त्रीयदृष्टान्तेन प्रतिपादयति। तदेवं यदा पूर्वपरयोः द्वयोः शास्त्रयोः अन्यत्र चरितार्थयोः एकस्मिन् लक्ष्ये युगपत्प्रसङ्गः, तदा युगपत् द्वयोः कस्यापि कार्यं न सम्भवति। अस्यामवस्थायां बाधकाभावात् द्वयोरपि प्रवृत्तिः पर्यायेण स्यात्। यथा "ण्वुल्तृचौ" इत्यनेन ण्वुल्तृचोः प्रत्यययोः धातुमात्राद्विधानेन विनिगमकाभावात् सर्वव्यक्त्युद्देश्येन तयोर्विधानाद्, एकस्मिन् लक्ष्ये तयोः युगपदसम्भवात् पर्यायेण तयोः प्रवृत्तिर्भवति। तेन कारकः, कर्ता इत्यादि सिद्ध्यति। तद्वत् वृक्षेभ्यः इत्यादिलक्ष्ये "सुपि च" "बहुवचने झल्येत्" इत्यनयोः दीर्घैत्वशास्त्रयोः कस्यापि व्यक्तिविशेषविषयकत्वाभावेन उभयोरपि स्वस्वसर्वव्यक्ति-विषयतया उपप्लवेन पर्यायप्रसङ्गेन द्वयोरपि प्रवृत्तिसम्भवे सति विप्रतिषेधे परमेवेति नियमार्थं विप्रतिषेधसूत्रम्। परमेवेति नियमात् पूर्वबाधितस्य न प्रवृत्तिप्रसङ्गः इति विप्रतिषेधसूत्रस्य नियमार्थत्वे सकृद्गतिन्यायसिद्धिः।

4.2 तुल्बलयोरित्यादि लौकिकदृष्टान्तेन पुनः प्रसङ्गन्यायसिद्धिः

विप्रतिषेधसूत्रस्य विध्यर्थत्वे सकृद्गतिन्यायसिद्धिः इति तुल्यबलयोरेकः प्रेष्यः इत्यादि लौकिकदृष्टान्तेन प्रतिपादयति। तदेवं तुल्यबलयोः द्वयोः स्वामिनोः एकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति। यदा तमुभौ युगपत् प्रेषयतः नानादिक्षु च कार्ये भवतः तदा प्रेष्यो युगपत् उभयोः करणासम्भवात् उभयोः कार्यं न करोति। तथैव स्वामिस्थानीययोः लक्ष्यार्थयोः शास्त्रयोः प्रेष्यस्थानीये

क्वचिल्लक्ष्ये युगपत्प्रवृत्त्यसंभवाद् अप्रवत्तौ प्राप्तायां विप्रतिषेधं सूत्रं परविध्यर्थमिति। परशास्त्रे प्रवृत्ते यदि पूर्वशास्त्रप्राप्तिरस्ति तर्हि तदपि भवति इति विप्रतिषेधसूत्रस्य विध्यर्थत्वे पुनः प्रसङ्गविज्ञानन्यायसिद्धिः।

5.0 विषयसंग्रहः

अस्मिन् पाठे आरम्भे बाधबीजप्रकरणमिति नामकरणे बीजं प्रदर्श्य अस्मिन् बाधबीजप्रकरणे शास्त्रयोः परस्परं बाध्यबाधकभावे किं बीजमित्येतन्निरूपणाय काश्चन परिभाषाः पठिताः। तासु प्रथमा परिभाषा भवति "पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः" इति। इयं च परिभाषा पूर्वपूर्वशास्त्रापेक्षया उत्तरोत्तरशास्त्रस्य बलवत्त्वं सूचयति। विप्रतिषेधशास्त्रमूलिकेयं परिभाषा। एवञ्च "विप्रतिषेधे परं कार्यम्" इति सूत्रेण उच्यमानमेव कार्यमनयाऽपि बोध्यते। तत्र पूर्वात् परशास्त्रं, परान्नित्यशास्त्रं, नित्यादन्तरङ्गशास्त्रम्, अन्तरङ्गादपवादशास्त्रं क्रमेण बलीयः भवति। एवमेव पूर्वान्नित्यान्तरङ्गापवादशास्त्राणि बलीयांसि इत्यादि पूर्वपूर्वापेक्षया उत्ततोत्तरशास्त्राणां बलवत्त्वमित्याद्यर्थः कथं सम्पद्यते इति प्रतिपादितं, क्रमेण तेषामुदाहरणानि च प्रदर्शितानि। ततः भिन्धि इत्यादौ तातङा परत्वाद्बाधितो धिर्न स्यादित्याशङ्क्य "पुनः प्रसङ्गविज्ञानात् सिद्धम्" इति परिभाषया पुनः धिः साधितः। परन्तु अस्याः परिभाषाया अङ्गीकारात् तिसृणाम् इत्यत्र त्रि+आम् इति दशायां परत्वात् त्र्यादेशं बाधित्वा तिस्रादेशे कृतेऽपि स्थानिवत्त्वेन त्रित्वबुद्ध्या पुनः त्रयादेशः स्यात्। तथा सति तिसृणामिति न सिद्ध्येत् अतः "सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव" इति परिभाषाऽऽरब्धा। एवञ्च द्वयोः शास्त्रयोः एकत्रप्राप्तयोः परत्वात् यस्य बाधः स पुनः न प्रवर्तते इति नियमात् तिस्रादेशे कृते पुनः त्र्यादेशस्य न प्राप्तिरिति समाहितम्। ततः विप्रतिषेधशास्त्रस्यैव नियमार्थत्वं स्वीकृत्य तृजादिवच्छास्त्रद्वयप्रसङ्ग इत्यादि शास्त्रीयदृष्टान्तेन शास्त्रद्वयस्यापि पर्यायता सिद्धे परमेवेति नियमात्

e-pathshala ई-पाठशाला A Gateway to all Post Graduate Courses

सकृद्गतिन्यायसिद्धिः। एवमेव विप्रतिषेधशास्त्रस्य विधित्वपक्षे तुल्यबलयोरेकः प्रेष्यः इत्यादि लौकिकदृष्टान्तेन एकत्रलक्ष्ये युगपत्प्रवत्तेः असम्भवात् परं भवति विध्यर्थं विप्रतिषेधसास्त्रम्। एवं परप्रवृत्तौ ततः यदि पूर्वस्यापि प्रसङ्गस्तर्हि तदपि भवति इत्येवं रीत्या पुनः प्रसङ्गन्यायसिद्धिरित्येते अंशा विस्तरेण प्रतिपादिताः।

Pathshala
पाठशाला
A Gateway to all Post Graduate Courses